केवलाष्टकं

केवलाष्टकं

मधुरं मधुरेभ्योऽपि मंगळेभ्योऽपि मंगळं |
पावनं पावनेभ्योऽपि हरेर्नामैव केवलं || 1 ||

आब्रह्मस्तंबपर्यंतं सर्वं मायामयं जगत् |
सत्यं सत्यं पुनः सत्यं हरेर्नामैव केवलं || 2 ||

स गुरुः स पिता चापि सा माता बांधवोऽपि सः |
शिक्षयेच्चेत् सदा स्मर्तुं हरेर्नामैव केवलं || 3 ||

निःश्वासे न हि विश्वासः कदा रुद्धो भविष्यति |
कीर्तनीयमतो बाल्याद्धरेर्नामैव केवलं || 4 ||

हरिः सदा वसेत्तत्र यत्र भागवता जनाः |
गायंति भक्तिभावेन हरेर्नामैव केवलं || 5 ||

अहो दुःखं महादुःखं दुःखाद्दुःखतरं यतः |
काचार्थं विस्मृतं रत्नं हरेर्नामैव केवलं || 6 ||

दीयतां दीयतां कर्णो नीयतां नीयतां वचः |
गीयतां गीयतां नित्यं हरेर्नामैव केवलं || 7 ||

तृणीकृत्य जगत्सर्वं राजते सकलोपरि |
चिदानंदमयं शुद्धं हरेर्नामैव केवलं || 8 ||

इति केवलाष्टकं ||